## Vision (दृष्टि:)

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा इति विचारं दृष्टिं च मनसि निधाय मिथिलायाः ग्रामीणक्षेत्रे संस्कृतस्य संस्कृतेश्च संरक्षणाय संवर्द्धनाय च पूर्वतः संलग्नाः कटिबद्धाः ग्रामीणजनाश्छात्राश्च पुनर्जागरुकाः सम्प्रेरिता भवेयुरेतदर्थमेव महाविद्यालयस्यास्य स्थापनाऽभूत् । सम्पूर्णे भारतवर्षे संस्कृतमहाविद्यालयादस्मात् पारम्परिकं शास्त्रीयज्ञानञ्चाधिगत्य छात्राः सामाजिकाश्च मिथिलाया गौरवं संवर्धयन्त्विति महाविद्यालयस्य दृष्टिः।

## Mission (लक्ष्यम्)

१. ग्रामीणजनेषु छात्रेषु च संस्कृतम्प्रत्यभिरुचिजागरणं मुख्यं लक्ष्यम् ।

२. मिथिलायां शास्त्रपरम्परा अतीवप्राचीना प्रसिद्धा च वर्तते। अस्याः परम्परायाः संरक्षणं संवर्धनञ्च महाविद्यालयस्य सारस्वतं लक्ष्यं वर्तते ।

३. इयं संस्था ग्रामीणक्षेत्रे वर्तते तत्र जनेषु वैदिक-कर्मकाण्डादीनां षोडशसंस्काराणाञ्च सम्यक् परिज्ञानं परिपालनञ्च भवेदित्यर्थं महाविद्यालयद्वारा सततप्रयासः विधीयते । षोडशसंस्काराणां परिपालने संस्कृतव्याकरणस्य ज्ञानमावश्यकं भवति । अतः सामाजिकाः शुद्धिमशुद्धिं च परिभाव्य व्यावहारिकजीवने सम्यक् रीत्या कर्मकाण्डं सम्पादयेयुरिति महाविद्यालयस्य व्यावहारिकं लक्ष्यम् ।

४. संस्कृतसम्भाषणविविधसंगोष्ठ्यादीनां समायोजनेन समाजे संस्कृतस्य प्रचारः प्रसारः।

५. नवशिक्षानीतिसाहाय्येन भारतीयज्ञानपरम्परायाः सम्पोषणम् ।